भ्रश, भ्रंशे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रेफयुक्तः । भ्रशति । इति दुर्गादासः ॥

भ्रंश, इर् श उ अधःपते । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) भ्रश्यति । इर् अभ्रशत् । अभ्रंशीत् ॥

भ्रंश, ङ उ ङ अधःपते । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ङ अभ्रशत् । उ भ्रंशित्वा भ्रष्ट्वा । ङ भ्रंशते । इति दुर्गादासः ॥

भ्रम, इर् चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) इर् अभ्रमत् अभ्रमीत् । इति दुर्गादासः ॥

भ्रम, भ य चाले । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) भ य भ्राम्यति । इति दुर्गादासः ॥

भ्रम, उ ज श चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) उ भ्रमित्वा भ्रान्त्वा । ज भ्रामः भ्रमः । ज्वलादित्वाण्प्रत्ययेऽपि जनवध इत्यादिना ह्रस्वे भ्रम इत्येव । तेन ज्वलादावस्य पाठो निष्फल इति धातुप्रदीपादयः । वस्तुतस्तु । ज्वलादिपाठसामर्थ्यान्न ह्रस्वः । श भ्रेमतुः बभ्रमतुः । य भ्रम्यति भ्रमति । चाल इह पादविहरणम् ।
"न जाने को हेतुर्भ्रमति विपिने भिक्षुक इव ।"
भ्रेमुः शिलोच्चयान् भीमानित्यत्र गत्यर्थविवक्षया सकर्म्मकत्वम् । इति दुर्गादासः ॥

भ्रमः, पुं, (भ्रमु अनवस्थाने इति । भ्रम+भावे घञ् ।) मिथ्याज्ञानम् । (यथा, राजतरङ्गिण्याम् । ३ । ४२३ ।
"देवो जगाद तं भद्र! कोऽयं ते मनसि भ्रमः ॥")
तत्पर्य्यायः । भ्रान्तिः २ मिथ्यामतिः ३ । इत्यमरः । १ । ५ । ४ । अम्बुनिर्गमः । कुन्दः । (यथा, रघौ । ६ । ३२ ।
"अवन्तिनाथोऽयमुदग्रबाहु-
विंशालवक्षास्तनुवृत्तमध्यः ।
आरोप्य चक्रभ्रममुष्णतेजाः
त्वष्ट्रेव यत्नोल्लिखितो विभाति ॥"
"चक्रभ्रमं चक्राकारशस्त्रोत्तेजनयन्त्रम् ।
भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दाख्ये शिल्पियन्त्रके ॥"
इति तट्टीकायां मल्लिनाथः ॥)
भ्रमणम् । इति मेदिनी । मे, २० ॥ (यथा, कथासरित्सागरे । २७ । ४६ ।
"एवं क्लिश्यन्ना व्यसृजत् तं भ्रमाय वणिक्-
सुतम् ।")
न्यायमते भ्रमस्य नामान्तरं अप्रमा । भ्रमो द्विविधः । विपर्य्यासः संशयश्च । आद्यो यथा । देहे आत्मबुद्धिः । शङ्खादौ पीततामतिः । सा निश्चयरूपा । द्वितीयो यथा । किंस्विन्नरो वा स्थाणुर्वा इत्यादिबुद्धिः । तस्य कारणम् । पित्तदूरत्वमोहभयादिनानाविधदोषः । यथा,
"अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते ।
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः ।
आद्यो देहे ह्यात्मबुद्धिः शङ्खादौ पीततामतिः ॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते ।
किंस्विन्नरो वा स्थाणुर्व्वेत्यादिबुद्धिस्तु संशयः ॥
तदभावप्रकारा धीस्तत्प्रकारा तु निश्चयः ।
स संशयो भवेद् या धीरेकत्राभावभावयोः ॥
साधारण्यादिधर्म्मस्य ज्ञानं संशयकारणम् ।
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ॥
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ।"
इति भाषापरिच्छेदः । १२७—१३२ ॥
(भ्रमणशीले, त्रि ॥ यथा, ऋग्वेदे । ६ । ६ । ४ ।
"अधभ्रमस्त उर्व्विया विभाति
यातयमानो अधिसानुपृश्नेः ॥"
"भ्रमो भ्रमणशीलो ज्वालासमूहः ॥" इति तद्भाष्ये सायनः ॥ रोगविशेषः । तद्यथा,—
"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः ।
चक्रवद्भ्रमतो गात्रं भूमौ पतति सर्व्वदा ।
भ्रमरोग इति ज्ञेयो रजःपित्तानिलात्मकः ॥"
इति वैद्यकमाधवकृतरुग्विनिश्चये मूर्च्छाधिकारे ॥
तथाचास्य चिकित्सा ॥
"शतावरी बलामूलद्राक्षासिद्धं पयः पिबेत् ।
ससितं भ्रमनाशाय बीजं वात्यालकस्य च ॥
पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये ।
त्रिफलायाः प्रयोगो वा प्रयोगः पयसोऽपि वा ॥
इति वैद्यकचक्रपाणिसंग्रहे मूर्च्छाद्यधिकारे ॥)

भ्रमणं, क्ली, (भ्रम+भावे ल्युट् ।) गमनविशेषः । पर्य्यटनम् । (यथा, भाषापरिच्छेदे । ७ ।
"भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च ॥"
पुनःपुनर्गमनम् । यथा, देवीभागवते । १ । १४ । ४६ ॥
"संसारेऽस्मिन्महाघोरे भ्रमणं नभचक्रवत् ॥"
तथाच, कामन्दकीये । १४ । २४ ।
"नवाग्निधूमसंरोधो दिङ्मोहो भ्रमणानि च ॥"
"भ्रमणानि दिग्भ्रमात् दुर्गमप्रदेशेषु चंक्रमणानि ।"
भ्रमत्यस्मिन्ननेनेति वा । भ्रम+ल्युट् ।) मण्डलम् । यथा, सूर्य्यसिद्धान्ते । १२ । ७६ ।
"कालेनाल्पेन भ्रमणं भुङ्क्तेऽल्पभ्रमणाश्रितः ।
ग्रहः कालेन महता मण्डले महति भ्रमन् ॥"
अल्पभ्रमणं स्वल्पपरिधिमण्डलमानमित्यर्थः । उत्तरपदे मण्डले महतीति दर्शनात् ॥")
हस्त्यश्वरथदोलादिद्वारा भ्रमणगुणाः । वातकोपनत्वम् । अङ्गस्थैर्य्यकरत्वम् । बलाग्निविवर्द्धनत्वञ्च । इति राजवल्लभः ॥

भ्रमणी, स्त्री, (भ्राम्यति अनयेति भ्रम+करणे ल्युट् । ङीप् ।) कारण्डिका । अधीशितुः क्रीड़ाद्या । इति मेदिनी । ने, ६६ ॥

भ्रमत्कुटी, स्त्री, (भ्रमन्ती चलन्ती कुटी क्षुद्रगृहमिव ।) तृणादिच्छत्रम् । तत्पर्य्यायः । कात्रारी २ जङ्गलकुटी । इति त्रिकाण्डशेषः ॥

भ्रमरः, पुं, (भ्रमति प्रतिकुसुममिति ॥ अर्त्तिकमीत्यादिना । "उणा० ३ । १३२ । इति अरः ।) कीटविशेषः । (यथा, रघुवंशे । ८ । ३८ ।
"भ्रमरैः कुसुमानुसारिभिः ।")
तत्पर्य्यायः । मधुव्रतः २ मधुकरः ३ मधुलिट् ४ मधुपः ५ अली ६ द्विरेफः ७ पुष्पलिट् ८ भृङ्गः ९ षट्पदः १० अलिः ११ । इत्यमरः । २ । ५ । २९ ॥ कलालापः १२ शिलीमुखः १३ पुष्पन्धयः १४ मधुसृत् १५ द्विपः १६ भसरः १७ चञ्चरीकः १८ सुकाण्डी १९ मधुलोलुपः २० इन्दिन्दिरः २१ मधुमारकः २२ । इति राजनिर्घण्टः ॥ मधुपरः २३ लम्बः २४ पुष्पकीटः २५ मधुसूदनः २६ भृङ्गराजः २७ मधुलेही २८ रेणुवासः २९ । इति शब्दरत्नावली ॥ कामुकः । इति मेदिनी । रे, १९१ ॥

भ्रमरकः, पुं, (भ्रमर इवेति भ्रमर+"इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) ललाटलम्बितचूर्णकुन्तलः । इत्यमरः । २ । ६।९६ ॥ (स्वार्थे कन् । भृङ्गः । बालमूषिकः । इति । मेदिनी । के, २०४ ॥ अम्बुभ्रमः । इति विश्वः ॥

भ्रमरकीटः, पुं, (भ्रमर इव कीटः ।) कीटविशेषः । कुमुरे पोका इति भाषा ॥ यथा,—
"जीवन्मुक्तस्तु तद्विद्वान् पूर्व्वोपाधिगुणांस्त्य-
जेत् ।
सच्चिदानन्दधर्म्मत्वाद्भजेद्भ्रमरकीटवत् ॥"
इत्यात्मबोधः ॥

भ्रमरच्छली, स्त्री, (भ्रमरान् छलयतीति । छलि+अच् । गौरादित्वात् ङीष् ।) लताविशेषः । तत्पर्य्यायः । भृङ्गाह्वा २ भ्रमरा ३ भृङ्गमूलिका ४ । अस्या गुणाः । यथा, राजनिर्घण्टे ।
"भृङ्गच्छली च कटुका तिक्ता दीपनरोचनी ।"

भ्रमरप्रियः, पुं, (भ्रमरस्य प्रियः ।) धाराकदम्बः । इति रत्नमाला ॥

भ्रमरमारी, स्त्री, (भ्रमरान् मारयति गन्धोत्कर्षेण व्याकुलयतीति । मृ+णिच्+अण् । गौरादित्वात् ङीष् ।) मालवदेशप्रसिद्धपुष्पवृक्षविशेषः । तत्पर्य्यायः । भ्रमरारिः २ भृङ्गारिः ३ भृङ्गमारी ४ मांसपुष्पिका ५ कुष्ठारिः ६ भ्रमरी ७ यष्टिलता ८ । अस्या गुणाः । तिक्तत्वम् । पित्तश्लेष्मज्वरनाशित्वम् । शोफकण्डूतिकुष्ठव्रणदोषत्रिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

भ्रमरा, स्त्री, (भ्रमर+अजादित्वात् टाप् ।) भ्रमरच्छली । इति राजनिर्घण्टः ॥

भ्रमरातिथिः, पुं, (भ्रमरः अतिथिरभ्यागतो यस्य ।) चम्पकः । इति राजनिर्घण्टः ॥

भ्रमरानन्दः, पुं, (मधुबाहुल्यात् भ्रमराणामानन्दो यस्मात् सः ।) वकुलः । अतिमुक्तकः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

भ्रमरालकः, पुं, (भ्रमर इव अलति भूषयतीति । अल+ण्वुल् ।) ललाटस्थितचूर्णकुन्तलः । तत्पर्य्यायः । भ्रमरकः २ कुरुलः ३ । इति हेमचन्द्रः । ३ । २३३ ॥

भ्रमरी, स्त्री, (भ्रमर+ङीष् ।) जतुका । पुत्रदात्री । षट्पदी । इति राजनिर्घण्टः ॥

भ्रमरेष्टः, पुं, (भ्रमराणामिष्टः ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥